International Journal of Applied Research 2018; 4(11): 240-241




**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 5.2
IJAR 2018; 4(11): 240-241
www.allresearchjournal.com
Received: 12-09-2018
Accepted: 26-10-2018

**डॉ0 उमेश कुमार मंडल**
श्री बालेश्वर मंडल, गंगाराही, रजौर
रामभद्रपुर, ईलमासनगर,
समस्तीपुर, बिहार, भारत

**Correspondence**
**डॉ0 उमेश कुमार मंडल**
श्री बालेश्वर मंडल, गंगाराही, रजौर
रामभद्रपुर, ईलमासनगर,
समस्तीपुर, बिहार, भारत

# पुरूषार्थचतुष्टयसाधकं संस्कृतम्

**डॉ0 उमेश कुमार मंडल**

**सारांश**

ऋग्वेदस्य दशमे मण्डले पञ्चविंशतितमं सूक्तं सूर्यासोमयोः विवाहस्य सकलं विधिमुपवर्णयति। तत्र नवोढ़ा वधूः उपदिश्यते यत् सा सम्प्रति गृहपत्नी वर्तते। अतः सा नूतनं गृहे गच्छेत्। तत्र प्रजापती सती गार्हपत्यं कर्मसावधानं निर्वहेत्–''गृहांगच्छ गृहपत्नी यथासो वशिनो त्वं विदशमा वदासि इह प्रियं प्रजया ते समृध्यतामस्मिन्गृहे गार्हपत्याय जागृहि।[1] ब्राह्मणाय उदाहरणम्, छात्रेभ्यो विद्याध्ययनार्थं सौविध्यकल्पनम् अतिथि–शिशुः गर्भिणीप्रभृतीनां परिचर्या–इयानि सकालान्यपि कार्याणि गृहस्थम् इतराश्रमिभ्यः श्रेष्ठं साधयन्ति।

गृहस्थ एव यजते गृहस्थस्तप्यते तपः।
चतुर्ण्णमाश्रगाणां तु गृहस्थस्तु विशिष्टयते।।
यथा मातत्माश्रृत्य सर्वे जीवन्तिं जन्तवः।
एव गृहस्थामाश्रित्य सर्वे जीवन्ति भिक्षवः।। [2]

**मनुनाऽप्युक्तम्**

यथा वायुं समाश्रित्य वर्तन्ते सर्वजन्तवः।
तथा गृहस्थाश्रममास्तित्य वर्तन्ते सर्वाश्रमाः।।
अस्मात् त्रयोग्प्यश्रमिणो ज्ञानेनान्नेन चान्वहम्।
गृहस्थेनैव धार्मकते तस्मात्श्रेष्ठाश्रमी गृही।।[3]

भारतीयसमाजे चतुर्ण्णामाश्रमाणां व्यवस्था विहिता वर्तते।

1) ब्रह्मचर्याश्रमः
2) गृहस्थाश्रमः,
3) वानप्रस्थाश्रमः
4) संन्यासाश्रमश्च।

चतुर्ष्वाश्रमेषु गृहस्थाश्रमस्य समधिकं महत्त्वं विद्यते। यतोहि, त्रयोऽन्ये आश्रमा अमुमेवं आश्रममवलम्ब्य प्रवर्तन्ते। अतः न केवलं गृहस्थाश्रमस्य परिपालनार्थम्, अन्येषां त्रयाणां गृहस्थेतराश्रमाणां निर्वाहायापि संस्कारस्यास्य आवश्यकता वरीवर्ति। ऋणत्रयस्य कल्पना वैदिकान्चारस्य पीठस्थली वर्तते।

**मनुः प्रत्यपादयतः**

अनधीत्य द्विजो वेदाननुत्पाद्य तथा सुतान्।
अनिष्ट्वा चैव यज्ञैश्च मोखमिच्छन् व्रजत्यवः।।

पचमहायज्ञानाम् अनुष्ठाता गृहस्थाश्रमः सर्वेष्वाश्रमेषु श्रेष्ठो मन्यते। अयमाश्रमः सर्वेषामाश्रमाणाम् आधार एव न, आश्रमोऽपि अस्ति। अस्मादेव कारणात् आचार्य गृहस्थं 'ज्येष्ठाश्रमो' इति वदन्ति।
अस्माकं मनीषिणश्चतुरः पुरुषार्थान् व्यदधुः धर्मोऽर्थः कामो मोक्षश्चेति। एतेषां प्रयोजनं व्यक्तेः समाजस्य चोदातस्वरूपस्य सङ्कल्पनमस्ति। एतस्य चतुर्वर्गस्य समवाप्तिरेव मानवजीवनस्य लक्ष्यम्। अतो जीवनकाले धमार्थकामानां समन्वितानुष्ठामेव मानवेनोद्दिष्टम्। मोक्षलाभाय धर्माचरणं सुतरामपेक्षितत्वात् अस्माकं महर्षयो धर्मानुष्ठानाय दम्पती साम्मेन संयुक्तया चोत्तरदायिनौ अमन्येताम्। अत एव गृहस्थाश्रमः सर्वेष्वाश्रमेषु मुख्यं स्थानं भजते। धर्मस्य सर्वोत्तमपुरुषार्थत्वेन अभिहितत्वात् ब्रह्मचर्य वानप्रस्थ–संन्यासाख्यास्त्राय आश्रमा धर्मसाधनरूपा अजायन्त। गृहस्थाश्रम एव खल्वेवम्भूत आश्रमो यत्रा मानवो निसर्गणां कामप्रवृत्तिम् अर्थपराणि कार्याणि च पूरयितुं प्रभवति। महाभारत च ''गृहस्थःप्रवरस्तेषाम्'' इत्युक्त्वा गृहस्थाश्रममेव स्थले स्थले प्रशंसते–

प्रजायतेः सलोकतां बृहस्पतेः शतक्रतोः।
वदन्ति ते परां गतिं गृहस्थ धर्मसेतुभिः।।[4]

गृहस्थाश्रमे एव व्यक्ते प्रत्यक्षः सामाजिकः सम्बन्धः सम्भाव्यते। अन्येष्वाश्रमेषु प्राधान्येन मानवस्य व्यक्तिकोत्कर्ष एवं लक्ष्यते। गृहस्थाश्रमे एव सामाजिकोभ्युदयाय मानवः प्रवर्तते। वानप्रस्था संन्यासी वा मुख्यतः आत्मीयम् आध्यात्मिकं कल्याणमेव कामयते। सांसारिकं हितचिन्तनं नितरां गौणायते। महाभारतम् एवम्भूतं पराश्रितं जनं सनाजस्य सर्वतोभावेन हितकरं न मन्यते। तदनुसारम् एकाकी जनः पुत्राः पौत्रा ऋषिदेव अतिथि प्रभृतीनां भरणपोषणादि अचिन्तयन् प्रयत्नलाधवेन जीवमानः स्वार्थम् आध्यात्मिकचिन्तनं विधाय मोक्षं प्राप्तुमर्हति। परं तेन समाजस्याभीष्टो लाभो न जायते।[5] अतः अस्याश्रमस्य सामाजिकं मूल्यमेव अस्योत्कर्षे कारणभूतम्। गृहस्थस्य जीवनं ध्यानस्य कर्तव्यस्य चाविरता सरित् वर्तते यत्रा निःस्वार्थसेवायाः, अनुरागस्य, स्नेहस्य, वात्सल्यस्य, सामाजिक कर्त्तव्यस्य च पीयूषधारा सततं प्रवहमाना भवति।
ऋग्वेदकालादेव गृहस्थाश्रमस्य अत्यधिकमहत्त्वं वरीवर्ति। ऋषिः इन्द्रे स्तौति यत् स सोमपात् परं गृहे गच्छेत् यत्रा तस्याः कल्याणी पत्नी वर्तते–

''अपाः सोममस्तमिन्द्र प्रयाहि कल्याणीर्जाया सुरणंगृहे ते।''[6]

मानवजीवनस्य लक्ष्यं पुरुषार्थचतुष्टयसाधानं विद्यते। तत्रा धर्मो हि प्रमुखः मन्यते। अर्थकामावपि पुरुषार्थौ मन्येते। लोके त्रायोऽप्येते पुरुषार्था यद्यपि मिथो विरोधिनो भासन्ते तथापि गृहस्थाश्रमे मनुष्य एतास्त्रीनपि युगपत् सेवते। इदमैकत्रिाकं सेवनमेव गृहस्थाश्रमस्य महत्त्वविधायकम् अन्यतमं कारणं वर्तते। तत्रा देवार्चनम्, निश्छलं जीविकोपार्जनम्, इतरेषामाश्रमाणां सहाय्यम्, सन्तानोत्पत्त्या वंशरेखाया अविच्छिन्नतया आधानम्–इत्येतानि कर्माणि सम्पादयन् गृहस्थो धर्मेण सहैव अर्थं कामं चापि प्रपूरयति। वेदव्यासो महाभारते एतेषां परस्परविरोधिनां पुरुषार्थानां सुसमन्वयं सपत्नीके गृहस्थे एव प्रत्यपादयत्–

धर्मश्चार्थश्च कामश्च परस्पर निरोधिनः।
एषां नित्यविरूद्धानां कथमेकात्रा सङ्गमः।।
यदा धर्मश्च भार्या च परस्परवशानु गौ।
तदा धर्मार्थ कामानां त्रामाणामपि सङ्गमः।।

अत एव गृहस्थस्य पार्थक्यसम्पादनेन चतुर्वर्गे अर्थकामौस्थितिरहितौ जायते।
ऋग्वेदे विवाहस्य सुप्रतिष्ठितं गौरवान्वितं च रूपं समुपलभ्यते। कान्यां पत्नीत्वेन गृहणन्। त्वमपि पतिः कथयति भदहं सौभाग्यलाभाय त्वत्पाणिं गृहणमि। त्वमपि पतिरूपेण मया सह परावस्थाम् अवाप्नुयाः। स्रष्ट्राः अन्यैर्देवैश्च गृहस्थाश्रमम् अनुष्ठातुं मह्यं प्रदत्तऽसि। उक्तं यथा–

''गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या परदष्टिर्यथासः।
भमो अर्यया सविता पुरन्धिर्मह्यं त्वादुर्भार्हपत्याय देवाः।।''

दम्पती तयोरेव एकहृदयत्वं प्रतिपादयन्तौ देवान् उपस्थितान् सभ्यांश्च प्रत्यायतः यत् तयोर्हृदये जलमिव सम्मिलिते स्तः। यथा प्राणाः प्रेयांसो भवन्ति तद्वत् तावपि परस्परं प्रसादयुतौ स्थास्यतः। जगद्धारका इव तौ अन्योऽन्यं धारयिष्यतः। श्रोतृभिः सार्धं वक्तुं प्रीतिरिव तौ पारस्परिकम् अवच्छिन्नं प्रेमधारयिष्यतः–

''सम जन्तु विश्वेदेवाः समक्षो हृदयानि नौ।
सं मातरिश्वा सं धाता समुदेष्ट्री दधातु नौ।।''

इत्थं वयं पश्यामो यत् संस्काराणां मध्ये विवाहस्यात्यन्तमेव महत्त्वपूर्णं स्थानं वर्तते। वैदिकसाहित्ये विवाहोऽप्येको यज्ञ एव मन्यते। अत एव विवाहं सम्पाद्य गृहस्थजीवने प्रवेश आवश्यको मन्यते। तदभावे मानवोक्यज्ञियो यज्ञहीनो वाऽभिधीयते। तैत्तिरीयब्राह्मणे स्पष्टतया लिखितम्–
''अयज्ञियो वा एष योऽपत्नीकः 'इति' एवमेव ऋण त्रायान्मुक्तिः विवाहं विनाऽसम्भवा वर्तते। स्मृतय आश्रमव्यवस्थां पूर्णतया समर्थयन्ति। ता दृढं प्रपिपादयन्ति यद् ब्रह्मचर्याश्रमानन्तरम् अनिवार्यरूपेण विवाहो विधीयेत इति।''

चतुर्थमायुषो भागं वसित्वाद्य गुरोः कुले।
द्वितीयमायुषो भागं कृतदारो गृहे वसेत्।।
वनेषु च विहृत्यैव तृतीयं भागमायुषः।
चतुर्थमायुषो भागं त्यक्त्वा सङ्काम परिव्रजेत्।।

विवाहशब्दस्य तात्पर्यं स्त्रीपुरुषयोः सम्बन्धमात्रोणैव नास्ति अपितु तत्पश्चात् जातस्य शिशोः जायायाश्च रक्षणम् गार्हस्थ्यजीवनस्य आवश्यकता, पारिवारिक–जीवनस्य आदर्शश्च निहितो वर्तते।
'विवाह' शब्दस्य व्युत्पत्तिः 'वि' उपसर्गपूर्वक 'वह' प्रापणे धातोः धम् प्रत्ययात् जायते। धर्मशास्त्रो विवाहस्यानेके समानार्थकाः शब्दाः लभ्यन्ते। यथा–उद्वाहः, परिणयः, पाणिग्रहणं स्वीकारणम्, उपयमश्चेत्यादयः। तत्रा वहनमेव वाहः। विशिष्टो वाहो विवाह उच्यते। किमत्रा वैशिष्ट्यम् प्रतिग्रहादिषु अष्टविधोपायेषु अन्यतमेनोपायेन स्वीकृतानां येषामादिसप्तपद्यन्तानां कार्मणां संस्कृततत्वमेव तत्रा वैशिष्ट्यम्।
विवाहसंस्कारस्य अभीष्टताम्, अनिवार्यता, महिमानं च वीक्ष्य प्रश्नोऽयं स्वभावत उदेति यत् को नाम विवाहः, अस्य प्रश्नस्य विचारप्रसङ्गे विविधः शङ्काः समक्षमायान्तियत् विवाहे नाम–
1. कामाश्रिता काचनं मर्यादा।
2. पुत्राभिलाषेण विहितः पुंस्त्रीसम्बन्धः।
3. उपर्युक्तं सम्बन्धं निवौदुभ् अपेक्षितं बाह्यबन्धनमात्राम्।
4. स्त्रीपुंसो वास्तविकं तादात्म्यम्।

**संदर्भ**


1. व.ध.–8/3/14–16।
2. म.स्मृ.–3/77–78।
3. तत्रौव–10/85/26/27।?
4. महा. 12/309/60।
5. तत्रौव–12/10/22।
6. ऋ.वे. 3/5/3/7।